(1467) "ओ लडि उत्क्षेपणे" (X-चुरादि:-1542. सक. सेट्. उभ.)

अत्र ओकार: इत्संज्ञक इति **चान्द्रा** आहु: । धात्ववयव एव ओकार इति **क्षीरस्वामिप्रभृतय:** । '**उलडि**' इति पठित्वा 'उलण्डयति' इति **केचिदु**-दाहरन्ति । एवं बहुधा विप्रतिपत्तिरत्र । ओकारो धात्ववयव इत्यभ्युपगत्या-स्माभि: पूर्वं (138) **ओलण्डक** इत्यादीनि रूपाणि ण्यन्तात्, ण्यन्तप्रकृतिक-सन्नन्ताच्च प्रदर्शितानि । ओकार इत्संज्ञक इति पक्षे-लण्डक:-ण्डिका इत्यादीनि रूपाणि यथासम्भवं स्वयमेवोह्यानि । 'अनित्यण्यन्ता: चुरादय:' इत्याश्रित्य ओकारेत्त्वपक्षे 'ओदितश्च' (8-2-45) इति निष्ठानत्वे लण्डून: इत्यपि निष्ठायां प्रदर्शयन्ति । "**दौर्गास्तु** क्ते **लण्डिन** इत्युदाजहु: ; तच्च पापात् पापीय: । अव्यवहितस्य (निष्ठातकारस्यैव) नत्वात्" इति **क्षीरस्वामी** । युक्तं चैतत्; अन्यथा विन्नादिवत् विदित इत्यत्रापि निष्ठातकारस्य नकार: स्यात्; इत्यलमत्राधुना । '**ओलण्डित**मिवापश्यत् उग्रं समरताण्डवम्' (यादवाभ्युदय:-16-64) '**ओलण्डि**ताद्रिरपि जालितदिव्यधामा—' (धातुकाव्यम्-3-14) इत्यादिषु ओकारो धात्ववयव इत्येव प्रयोगा उपलभ्यन्ते इत्यपीहावधेयम् ।

(1468) "**लप व्यक्तायां वाचि**" (I-भ्वादि:-402. अक. सेट्. पर.)

लापक:-पिका, लापक:-पिका, लिलपिषक:-षिका, लालपक:-पिका ;
लपिता-त्री, लापयिता-त्री, लिलपिषिता-त्री, लालपिता-त्री ;
इत्यादीनि सर्वाणि रूपाणि भौवादिक**चपति**वत् (497) बोध्यानि । ण्यति [1]अपलाप्यम्, [2]प्रलापी,[A] [3]आलप्यालम्,[B] [C]कललापी, इमानि रूपाणि अस्य धातो: अधिकानीति विशेष: ।

---

1. आङ्पूर्वात् **लपे:** '**आसुयुवपिरपिलपि**—' (3-1-126) इति ण्यत्प्रत्यये रूप-मेवम् । यतोऽपवाद: ।
2. प्र इति उपपदे '**प्रे लपसृद्रु**—' (3-2-145) इत्यादिना घिनुण्प्रत्यये रूपमेवम् ।
3. 'अलंखल्वो: प्रतिषेधयो:—' (3-4-18) इति अलमुपपदे क्त्वाप्रत्यये समासे ल्यबादेश: ।

A. '**प्रलापिनो** भविष्यन्ति कदा न्वेतेऽपलाषिण: ।' भ. का. 7-12.

B. '**आलप्या**लमिदं बभ्रोर्यत्स दारानपाहरत् ।' शि. व. 2-40.

C. 'चेपु: सपन्तोऽसचितां प्रियां प्रिया: संध्येति रेपु: **कललापिन: शुका:** ।' धा. का. 1-52